# मम पुस्तकम्

नाम - ______________________

पत्र-सङ्केतः - ______________________

______________________

चल-दूरवाणी-सङ्ख्या - ______________________

# १२ वित्तीय-साक्षरता

**वयं ज्ञास्यामः**

- वित्तकोषे लेखायाः उद्घाटन-सम्बद्ध-विषयाणाम् उपयोगम्।
- वित्तकोष-सम्बद्धानां प्रपत्राणां पठनम्, अवगमनं पूरणं च।

## मम लेखा मम प्रतिष्ठा

अमृता स्वस्य मृद्-धन-पात्रम् (गुल्लक) त्रोटितवती । तस्मिन् मृद्-धनपात्रे अनेकानि धनपत्राणि नाणकानि च आसन्। छन्-छन् इति ध्वनिं कुर्वन्ति नाणकानि अधः पतितानि। अमृता तेषां गणनां कृतवती। आहत्य २५७३ रूप्यकाणि आसन्। एतत् धनं सा अतीव यत्नेन सङ्गृहीतवती । अधुना अस्य धनस्य संरक्षणस्य विषये चिन्तनीयम् । अमृता लीलावती लक्ष्मीः च घनिष्ठसख्यः सन्ति । धनसंरक्षणस्य परामर्शार्थं सा लीलावत्याः लक्ष्म्याः च समीपं गतवती। लीलावती वित्तकोषे पत्रालये वा सञ्चयनं कर्तुं परामर्शं दत्तवती। अमृता कुपिता जाता – “अहं बहुवारं वित्तकोषं गतवती, परन्तु किमपि प्रयोजनं न अभवत् ।” लक्ष्मीः उक्तवती – “अधुना तादृशी स्थितिः नास्ति ।” तासां मध्ये महान् विवादः जातः।

अन्ततः अमृता वित्तकोषे धनसञ्चयार्थम् अङ्गीकृतवती । सर्वाः सख्यः वित्तकोषं गतवत्यः । तत्र एकं फलकम् आसीत् । फलकं पठित्वा तिस्रः अपि स्मितहासं कृतवत्यः। तत्र अन्यविवरणानि अपि प्राप्तानि। यथा जन-धन-योजनानुसारं लेखायाः उद्घाटनं भवति इति । प्रारम्भिकराशिं विना अपि लेखायाः उद्घाटनं कर्तुं शक्यते। तेन साकं ऋणस्य प्राप्तिः अपि भवितुम् अर्हति। दुर्घटना-सुरक्षा-निधिः अपि प्राप्यते। एवञ्च तदा तदा सर्वकारेण दीयमानाः आर्थिक-सहायताः अपि साक्षात् वित्तकोषस्य लेखायां प्राप्यन्ते इति।

ताः आश्चर्यचकिताः प्रसन्नाः च जाताः । ताः जानन्ति यत् वित्तकोषे तासां धनं सुरक्षितं भविष्यति इति । वित्तकोषे सञ्चितनिधिं प्रति वृद्धिनिधिः अपि प्राप्यते । एतावन्तः लाभाः वा ! अद्भुतम् !

तर्हि कुतः लीलावती अमृता लक्ष्मीः च लेखाम् न उद्घाटयिष्यन्ति ! लीलावती अमृता लक्ष्मीः च सञ्चयलेखाम् उद्घाटयितुम् एकं प्रपत्रं पूरयित्वा समर्पितवत्यः । अमृता मतदातृ-परिचय-पत्रस्य आधार-पत्रस्य च प्रतिलिपिं योजितवती । तत्र तस्याः निवासस्थानस्य सम्पूर्णविवरणम् आसीत् । लीलावत्याः रूपे-पत्रं (RuPay Card) लुप्तं जातम् । सा ग्रामप्रधान-द्वारा पत्रं लेखयित्वा समर्पितवती ।

केषुचित् दिनेषु पत्रवाहकः तासां गृहम् आगत्य डेबिट्/रूपे-विपत्रं

(स्वचालितधनयन्त्र-पत्रम् / ए.टी.एम्. कार्ड्) प्रदत्तवान् । रूपे-पत्र-द्वारा कस्यचित् अपि वित्तकोषस्य स्वचालितधनयन्त्रात् (ए.टी.एम्-तः) स्वस्य धनं निष्कासयितुं शक्यते ।

रूपे-पत्रं प्राप्य ताः अतीव सन्तुष्टाः जाताः । लीलावती उक्तवती – "अस्माकं तु प्रतिष्ठा वर्धिता । वयम् अपि लेखायुक्ताः जाताः ।"

**"मम लेखा मम प्रतिष्ठा ।"**

*—निशात फारूक*

- **वित्तकोषे लेखाम् उद्घाटयतु ।**
- **कुसीदकात् मुक्तिं प्राप्नोतु ।**
- **लेखायाः उद्घाटनम् अतीव सरलम् । लघु प्रपत्रं पूरणीयम् ।**
- **प्रपत्रेण साकं किमपि परिचय-पत्रं योजनीयम् ।**
- **यदि पूर्वम् एव लेखा उद्घाटिता अस्ति तर्हि जन-धन-योजनायां योजयितुं शक्यते ।**

## पाठस्य आधारेण वचनानि मेलयित्वा वाक्यनिर्माणं कुर्वन्तु ।

| | |
|---|---|
| १. वित्तकोषे लेखायाः उद्घाटनं | क. परिचय-पत्रस्य प्रतिलिपिः समर्पणीया |
| २. वित्तकोषे धनं | ख. लेखायाः उद्घाटनं कर्तुं शक्यते |
| ३. प्रारम्भिक-राशिं विना | ग. डेबिट्-रूपे-पत्रं प्रदत्तवान् |
| ४. पत्रवाहकः गृहम् आगत्य | घ. सरलम् अभवत् |
| ५. आवेदन-प्रपत्रेण साकं | ङ. सुरक्षितं भवति |

## पठन्तु चर्चां कृत्वा लिखन्तु च ।

प्रश्नः १. लीलावती धनस्य सञ्चयार्थं अमृतायै कीदृशं परामर्शं दत्तवती ?

प्रश्नः २. वित्तकोषे भवतः / भवत्याः सञ्चयलेखा अस्ति वा ? स्वस्य वित्तकोषस्य नाम लिखतु ।

प्रश्नः ३. भवान्/भवती वित्तकोषे पत्रालये वा धनसञ्चयार्थम् अथवा निष्कासनार्थं काम् अपि समस्याम् अनुभूतवान्/अनुभूतवती वा ?

## अधः प्रदत्तम् आवेदन-प्रपत्रं पूरयन्तु ।

नाम ..................................................

आयुः ..................................................

लिङ्गम् ..................................................

पत्र-सङ्केतः ..................................................

..................................................

वार्षिक-आयः ..................................................

चल-दूरवाणी-सङ्ख्या ......................................

# पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु ।


जमापर्ची
PAY-IN-SLIP
नकद/अंतरण
CASH/TRANSFER
भारतीय स्टेट बैंक STATE BANK OF INDIA
.............................. शाखा/Branch
दिनांक/Date ..............20.......
खाते का प्रकार : बचत बैंक/चालू खाता/आवर्ती जमा/कैश क्रेडिट/सावधि ऋण
TYPE OF ACCOUNT : SB/CA/RD/CC/TL
खाता सं./A/c No.
For the credit of the Bank Account of ...................
.................................. के खाते में जमा करने हेतु
नकद/चेकों के विवरण (पर्ची के दूसरी ओर) ₹ पै. P.
Details of Cash/Cheques (Overleaf)
खाते में नकद जमा/Cash Deposit in the A/c
नकदी रखरखाव शुल्क/Cash handling Chrg.
कुल जमा/Total Deposit
रूपये (शब्दों में)/Rupees (in words) ....................
कार्यालय उपयोग हेतु/For Office Use
एसडब्ल्यूओ/SWO
रोकड़ अधिकारी/पासकर्ता अधिकारी Cash Officer/Passing Officer

CC.NO.100999131
CSD.FBD.: 9801/06.03.2013/1Lac Pads/Samira

जमापर्ची
PAY-IN-SLIP
भारतीय स्टेट बैंक / STATE BANK OF INDIA
.............................. शाखा / Branch
नकद/अंतरण
CASH/TRANSFER
नोट : कृपया नकद, चैक, ड्राफ्ट आदि जमा करने के लिए अलग-अलग पर्चियों का उपयोग करें/
Please use separate slips for depositing cash, cheque, drafts etc.
दिनांक/Date ....................20.........
खाते का प्रकार / Type of Account ( ✓ )
खाता सं./Account No.
बचत बैंक /SB | चालू खाता / CA | आवर्ती जमा /RD | कैश क्रेडिट / CC | सावधि ऋण / TL
के खाते में जमा करने हेतु / For the credit of the Bank Account of ....................
नोट : कृपया नकद/चेक की विवरण दूसरी ओर लिखें / NOTE : Please furnish details of cash/cheque overleaf
₹ पै./P.
खाते में नकद जमा / Cash Deposit in the Account
'पी' खण्ड के ग्राहकों को छोड़कर नकद रखरखाव शुल्क (कैश क्रेडिट/चालू खाता)/Cash Handling Chrg. (CC/CA) other than 'P' Segment Cust.
कुल जमा रूपए (शब्दों में) / Total Deposit (in words) ₹ ....................
मोबाइल/ टेलीफोन नं. / Mobile/Telephone No.
पैन नं. / PAN No.
शाखा/Branch
कोड नं./Code No
(यदि जमा राशि-मूल इतर (नॉन-होम) शाखा में जमा की जाती है)/(If Deposit is made for Non Home Branch)
जमाकर्ता के हस्ताक्षर / Signature of the Depositor
कार्यालय उपयोग हेतु / For Office Use
एसडब्ल्यूओ/ SWO
रोकड़ अधिकारी/पासकर्ता अधिकारी / Cash Officer/Passing Officer

धन-सङ्ग्रहणार्थं प्रपत्रम्


खाताधारक का (के) नाम / Name of the Account Holder(s)....................
भारतीय स्टेट बैंक
STATE BANK OF INDIA
..................शाखा / BRANCH
बचत बैंक आहरण फार्म
SAVINGS BANK WITHDRAWAL FORM
दिनांक
Date ....................
नोट : यह फार्म चेक नहीं है। इस फार्म के साथ पासबुक प्रस्तुत नहीं किए जाने पर भुगतान के लिए इनकार किया जाएगा। यह भुगतान केवल मूल (होम) शाखा में ही किया जाएगा।
NOTE : This form is not a Cheque. Payment will be refused if the pass book is not produced with this form. This payment will be made only at the Home Branch.
खाता संख्या
ACCOUNT NUMBER
कृपया मुझे / हमें Please pay self/ourselves ₹.................................. (₹ ....................
.................................................................................... मात्र/ only)
का भुगतान करें और मेरे /हमारे उपर्युक्त बचत/बैंक खाते को यह राशि नामे करें।/ and debit the amount to my/our above savings bank account.
फोन/मोबाइल नं./Phone/Mobile No.
खाताधारक (कों) के हस्ताक्षर Signature(s) of the Account Holder(s)
कार्यालय उपयोग हेतु/FOR OFFICE USE
पासकर्ता/Passed by | हस्ताक्षर/Signature | पासकर्ता/Passed by | हस्ताक्षर/Signature
एसडब्ल्यूओ/SWO | पासकर्ता अधिकारी/PASSING OFFICER
CC No. 100101080
CSD.FBD.:8757/07.10.13/50,000 Pads/Samira

धन-निष्कासनार्थं प्रपत्रम्




स्वचालित-धन-यन्त्र-पत्रम्
(ए.टी.एम्. कार्ड्)




लेखापुस्तिका




धनादेशः (चेक्)




२० रूप्यकस्य धनपत्रम्



स्वचालित-धन-यन्त्रम् (ए.टी.एम्.)

■ वित्तकोषात् स्वयं धनं निष्कासयितुम् अथवा अन्यस्मै धनं दातुं धनादेशस्य उपयोगः कर्तुं शक्यते। चित्रं दृष्ट्वा धनादेश-पूरणस्य अभ्यासं कुर्वन्तु।




■ वित्तकोषे लेखायां धनं समर्पयितुं सङ्ग्रहणप्रपत्रं पूरणीयं भवति। चित्रं दृष्ट्वा सङ्ग्रहणप्रपत्रस्य विषये जानन्तु।



- यथा वित्तकोषे लेखायां धनं सञ्चेतुं प्रपत्रं पूरणीयं भवति तथैव वित्तकोषे धनस्य निष्कासनार्थम् अपि एकं प्रपत्रं पूरणीयं भवति। चित्रं दृष्ट्वा निष्कासनप्रपत्रस्य विषये जानन्तु।

**धन-निष्कासन-प्रपत्रम्**




- रविः मालिन्यै धनादेश-द्वारा ७३०० रूप्यकाणि दातुम् इच्छति। धनादेशं पूरयितुं रवेः सहायतां कुर्वन्तु।



■ उमेशः वित्तकोषे १७०० रूप्यकाणि सञ्चेतुम् इच्छति। धन-सङ्ग्रहणप्रपत्रं पूरयितुम् उमेशस्य सहायतां कुर्वन्तु।

## धन-सङ्ग्रहण-प्रपत्रम्


जमापर्ची नकद/अंतरण
PAY-IN-SLIP CASH/TRANSFER
भारतीय स्टेट बैंक STATE BANK OF INDIA
.......... शाखा/Branch
दिनांक/Date ..........20......
खाते का प्रकार : बचत बैंक/चालू खाता/आवर्ती जमा/कैश क्रेडिट/सावधि ऋण
TYPE OF ACCOUNT : SB/CA/RD/CC/TL
खाता सं./A/c No.
For the credit of the Bank Account of ..........
.......... के खाते में जमा कराने हेतु
नकद/चेकों के विवरण (पर्ची के दूसरी ओर) Details of Cash/Cheques (Overleaf) ₹ पै. P.
खाते में नकद जमा/Cash Deposit in the A/c
नकदी रखरखाव शुल्क/Cash handling Chrg.
कुल जमा/Total Deposit
रूपये (शब्दों में)/Rupees (in words) ..........
कार्यालय उपयोग हेतु/For Office Use
एसडब्ल्यूओ/SWO रोकड़ अधिकारी/पासकर्ता अधिकारी Cash Officer/Passing Officer

CC.NO. 100999131
CSD.FBD.: 9801/06.03.2013/1Lac Pads/Samira

जमापर्ची PAY-IN-SLIP
भारतीय स्टेट बैंक / STATE BANK OF INDIA
.......... शाखा / Branch
नकद/अंतरण CASH/TRANSFER
नोट : कृपया नकद, चैक, ड्राफ्ट आदि जमा करने के लिए अलग-अलग पर्चियों का उपयोग करें/
Please use separate slips for depositing cash, cheque, drafts etc.
दिनांक/Date ..........20..........
खाते का प्रकार / Type of Account ( ✓ )
बचत बैंक /SB | चालू खाता / CA | आवर्ती जमा /RD | कैश क्रेडिट / CC | सावधि ऋण / TL
खाता सं./Account No.
के खाते में जमा करने हेतु / For the credit of the Bank Account of ..........
.......... नोट : कृपया नकद/चेक की विवरण दूसरी ओर लिखें / NOTE : Please furnish details of cash/cheque overleaf
₹ पै./P.
खाते में नकद जमा / Cash Deposit in the Account
'पी' खण्ड के ग्राहकों को छोड़कर नकद रखरखाव शुल्क (कैश क्रेडिट/चालू खाता)/Cash Handling Chrg. (CC/CA) other than 'P' Segment Cust.
कुल जमा रूपए (शब्दों में) / Total Deposit (in words) ₹ ..........
मोबाइल/ टेलीफोन नं. / Mobile/Telephone No.
पैन नं. / PAN No.
शाखा/Branch
कोड नं./Code No
(यदि जमा राशि-मूल इतर (नॉन-होम) शाखा में जमा की जानी है)/(If Deposit is made for Non Home Branch)
जमाकर्ता के हस्ताक्षर / Signature of the Depositor
कार्यालय उपयोग हेतु / For Office Use
एसडब्ल्यूओ/SWO
रोकड़ अधिकारी/पासकर्ता अधिकारी / Cash Officer/Passing Officer

■ लीलावती वित्तकोषात् २००० रूप्यकाणि निष्कासयितुम् इच्छति। धननिष्कासनप्रपत्रं पूरयितुं लीलावत्याः सहायतां कुर्वन्तु।

## धननिष्कासनप्रपत्रम्


खाताधारक का (के) नाम / Name of the Account Holder(s)..........
भारतीय स्टेट बैंक STATE BANK OF INDIA
.......... शाखा / BRANCH
बचत बैंक आहरण फार्म
SAVINGS BANK WITHDRAWAL FORM
दिनांक Date ..........
नोट : यह फार्म चेक नहीं है। इस फार्म के साथ पासबुक प्रस्तुत नहीं किए जाने पर भुगतान के लिए इनकार किया जाएगा। यह भुगतान केवल मूल (होम) शाखा में ही किया जाएगा।
NOTE : This form is not a Cheque. Payment will be refused if the pass book is not produced with this form. This payment will be made only at the Home Branch.
खाता संख्या
ACCOUNT NUMBER
कृपया मुझे / हमें Please pay self/ourselves ₹.......... (₹ ..........
.......... मात्र/only)
का भुगतान करें और मेरे /हमारे उपर्युक्त बचत/बैंक खाते को यह राशि नामे करें I/ and debit the amount to my/our above savings bank account.
फोन/मोबाइल नं./Phone/Mobile No.
खाताधारक (कों) के हस्ताक्षर Signature(s) of the Account Holder(s)
कार्यालय उपयोग हेतु/FOR OFFICE USE
पासकर्ता/Passed by | हस्ताक्षर/Signature | पासकर्ता/Passed by | हस्ताक्षर/Signature
एसडब्ल्यूओ/SWO | | पासकर्ता अधिकारी/PASSING OFFICER |

## ■ लीलावती अमृतां वित्तकोषे लेखायाः उद्घाटनस्य लाभान् पृच्छति ।




**अमृता वदति** – "वित्तकोषे लेखायाः उद्घाटनस्य एते लाभाः सन्ति–

- वयम्, अस्माकं सङ्गृहीतनिधिं सुरक्षिततया वित्तकोषे सञ्चेतुं शक्नुमः ।
- वित्तकोषे सञ्चितनिधेः वृद्धिनिधिं प्राप्नुमः ।
- आवश्यकतायाः अनुसारं वित्तकोषं गत्वा अथवा स्वचालित-धन-यन्त्रात् वा वित्तकोषे सञ्चितं धनं निष्कासयितुं शक्नुमः ।
- अन्तर्जाल-द्वारा मुद्रां विना अपि विनिमयं कर्तुं शक्नुमः ।
- अन्तर्जाल-द्वारा व्यय-पत्रकं पूरयितुं शक्नुमः । रेलयानस्य चिटिका च क्रेतुं शक्नुमः ।

अमृतायाः दैनन्दिनी – वित्तकोषस्य गणना

| | |
|---|---|
| १५ फरवरी-मासः | सञ्चितम् २००० |
| १८ फरवरी-मासः | निष्कासितम् ५०० |
| | शेषः १५०० |
| ४ मार्च्-मासः | सञ्चितम् १००० |
| | आहत्य २५०० |
| ११ मार्च्-मासः | निष्कासितम् ६०० |
| | शेषः १९०० |
| १७ मार्च्-मासः | निष्कासितम् ७०० |
| | शेषः १२०० |

**लीलावती** – कियत् धनं सञ्चितं कियत् धनं निष्कासितम् इति विवरणं कथं ज्ञायते ?

**अमृता** – अहं तु एकस्यां दैनन्दिन्यां विवरणं लिखामि। परन्तु अस्माभिः वित्तकोषात् लेखापुस्तिका (पासबुक) इति एका पुस्तिका प्राप्यते यत्र वित्तकोषे अस्माभिः कृतानां विनिमयानां विवरणं भवति ।

### अमृतायाः लेखापुस्तिका

| दिनाङ्कः | विवरणम् | सञ्चितराशिः | निष्कासितराशिः | शेषः |
|---|---|---|---|---|
| १५.०२.२०२३ | मुद्रा | २००० | | २००० |
| १८.०२.२०२३ | मुद्रा | | ५०० | १५०० |
| ०४.०३.२०२३ | मुद्रा | १००० | | २५०० |
| ११.०३.२०२३ | मुद्रा | | ६०० | १९०० |
| १७.०३.२०२३ | मुद्रा | | ७०० | १२०० |

यदि अमृता अप्रिल्-मासस्य ४ दिनाङ्के सञ्चयार्थं वित्तकोषे २५०० समर्पितवती तर्हि वित्तकोषस्य लेखापुस्तिकायाम् अस्य विवरणं कुत्र भविष्यति ? अमृतायाः लेखायाम् आहत्य कियत् धनं भविष्यति ?

**शिक्षक-निर्देशः**— चर्चां कुर्वन्तु यत् वित्तकोषे लेखायाः उद्घाटनं सरलम् अभवत् । एतदर्थं भावचित्र-द्वयं, मतदातृ-परिचय-पत्रं आधार-पत्रं वा भावचित्रयुक्तम् अन्यत् किमपि परिचय-पत्रं वा आवश्यकम् । जन-धन-योजनायां धनं विना अपि लेखायाः उद्घाटनं कर्तुं शक्यते । एवं विविधानां धनराशीनां समर्पणस्य निष्कासनस्य च विवरणं कथं लेखापुस्तिकायां भविष्यति इति प्रश्नान् पृष्ट्वा चर्चां कुर्वन्तु ।

## उचितशब्देन वाक्यं पूरयन्तु ।

१. __________ वा __________ वा लेखाम् उद्घाटयितुं शक्यते ।

२. स्वस्य __________ अनुसारं व्ययः करणीयः ।

३. वित्तकोषे सञ्चितधनस्य कृते __________ प्राप्यते ।

४. वित्तकोषे लेखायाः उद्घाटनार्थं __________, __________, __________ च आवश्यकम् ।

## स्वचालित-धन-यन्त्र-पत्रस्य (ए.टी.एम्. कार्ड् इत्यस्य) सङ्क्षिप्त-विवरणम्

वित्तकोषात् धनं निष्कासयितुं वित्तकोषे धनं समर्पयितुं च एकम् वैद्युतीय-पत्रं भवति । तस्य नाम अस्ति स्वचालित-धन-यन्त्र-पत्रम् (ए.टी.एम्. कार्ड्) इति । स्वचालित-धन-यन्त्र-पत्रेण कुत्रापि कदापि स्वचालित-धन-यन्त्रात् धनं निष्कासयितुं शक्यते । एवं च वित्तकोषस्य लेखायाः सर्वविध-विवरणम् अपि ज्ञातुं शक्यते । धन-विनिमयेन सम्बन्धितानां समस्यानां निवारणार्थं केवलं वित्तकोषे एव सम्पर्कः करणीयः । स्वचालित-धन-यन्त्र-विपत्रेण धनं निष्कासयितुं स्वचालित-धन-यन्त्रस्य उपयोगः करणीयः ।






### स्मरन्तु

धनादेशस्य समय-सीमा तस्मिन् लिखित-दिनाङ्कात् मासत्रय-पर्यन्तं भवति । 'क्रॉस् चेक्' लेखाधारकस्य लेखां प्रति एव दातव्यम् ।

### अधः प्रदत्तानि विवरणानि कदापि कस्मैचित् अपि न दातव्यम् ।

१. सकृत्-प्रयोज्य-कूटः (ओ.टी.पी.)
२. कूटसङ्ख्या (पिन्)
३. पत्र-सत्यापन-सङ्ख्या (सी.वी.वी.)
४. लेखा-सम्बद्ध-विवरणानि
५. वैयक्तिक-विवरणानि
६. कूटपदम् (पासवर्ड्)

## के.वै.सी. (KYC) किं भवति?

आत्मानं ग्राहकं परिचिनोतु (KYC) (Know Your Customer) कापि प्रक्रिया अस्ति । अनया प्रक्रियया वित्तकोषः कस्याश्चित् व्यक्तेः परिचयस्य पत्रसङ्केतस्य च विवरणं दृढं करोति । अधुना आधार-पत्रेण अपि के.वै.सी. प्रक्रियां कर्तुं शक्नुमः ।

### के.वै.सी. (KYC) निमित्तम् अपेक्षितानि व्यवहारपत्राणि

१. स्थायि-लेखा-सङ्ख्या-पत्रम् (पेन् कार्ड्)
२. विद्युतः व्ययपत्रकम्
३. आधार-पत्रम्
४. पत्र-सङ्केतः

## पठन्तु लिखन्तु च

अधः वित्तीयसाक्षरतया वित्तकोषेण च सम्बद्धाः केचन मुख्यविषयाः प्रदत्ताः सन्ति । एतान् पठन्तु ।

### वित्तीयसाक्षरता – कः अर्थः ?

- धनस्य संरक्षणस्य व्ययस्य च मध्ये समन्वयस्य बोधः ।
- धनसंरक्षणस्य विषये जागरूकता ।

### भवान् / भवती किं कर्तुं शक्नोति ?

- आयस्य, व्ययस्य, सञ्चयस्य च विवरणं लिखतु ।
- अनावश्यकः व्ययः मास्तु ।
- धनस्य सञ्चयं करोतु ।
- वित्तकोषे पत्रालये वा धनस्य सञ्चयार्थं लेखाम् उद्घाटयतु ।
- स्वस्य सञ्चितस्य धनस्य उचितस्थले सङ्ग्रहणं करोतु ।

### वित्तीयसाक्षरतायाः कः लाभः ?

- भविष्यत्-काले क्रियमाणस्य व्ययस्य कृते पूर्वसिद्धता भविष्यति ।
- भवतः / भवत्याः व्ययः नियन्त्रितः भवति ।
- जागरूकतया व्ययः कर्तुं शक्यते ।
- स्वस्य आवश्यकतानाम् अवगमनं भविष्यति ।

### वित्तकोषे लेखायाः उद्घाटनस्य के लाभाः भविष्यन्ति ?

- भवान् / भवती स्वस्य सञ्चितं धनं सुरक्षिततया वित्तकोषे सङ्ग्रहीतुं शक्नोति ।
- वित्तकोषे सञ्चितं धनं प्रति वृद्धिनिधिः प्राप्यते ।
- आवश्यकतायाः अनुसारं सञ्चितं धनं निष्कासयितुं शक्यते ।

### अधः प्रदत्तेषु वित्तकोषे लेखाम् उद्घाटयितुं किं किम् अपेक्षितम् । तस्य पुरतः ✓ चिह्नं स्थापयतु –

- भावचित्रम् ☐
- आधार् कार्ड् ☐
- स्थायि-लेखा-सङ्ख्या-पत्रम् (पेन् कार्ड्) ☐
- मतदातृ-परिचय-पत्रम् ☐

### वित्तकोषे लेखायाः उद्घाटनेन किं किं प्राप्यते ? –

- धनादेश-पुस्तिका (चेक् बुक्) ☐
- लेखा-पुस्तिका (पासबुक) ☐
- स्वचालित-धन-यन्त्र-पत्रम् (डेबिट् रूपे कार्ड्) ☐

## भीम इति तन्त्रकोषः (BHIM App)

भीम इति तन्त्रकोषः (BHIM App) धनस्य विनिमयार्थं चलदूरवाण्यां कश्चन तन्त्रकोषः भवति। एतत् 'वैद्युतीय-धनप्रदानम् (ई-पेमेण्ट्)' इत्यपि उच्यते। अनेन भवान् / भवती चलदूरवाण्या धनस्य विनिमयं कर्तुं शक्नोति।

- दूरस्थ-व्यक्तिं प्रति धनं प्रेषयितुं शक्नुमः।
- बालानां विद्यालयस्य शुल्कं दातुं शक्नुमः।
- विद्युतः व्यय-पत्रकं पूरयितुं शक्नुमः।
- आपणेषु वस्तुक्रयणार्थं धनं दातुं शक्नुमः।
- ऋणस्य निर्यातनं कर्तुं शक्नुमः।




एतदर्थं सर्वप्रथमं भवतः/भवत्याः चलदूरवाण्यां भीम इति तन्त्रकोषः अवतारणीयः (डौन्-लोड करणीयम्)। तदनन्तरं चलदूरवाण्यां सः तन्त्रकोषः संस्थापनीयः (इन्स्टाल् करणीयम्)। अस्मिन् २० भाषासु कार्यं कर्तुं शक्नुमः। अस्मिन् तन्त्रकोषे भवान्/भवती भारतीय-स्टेट्-बेङ्क इति वित्तकोष-सहितम् आहत्य ३० वित्तकोषाणां लेखानाम् उपयोगं कर्तुं शक्नोति।




(स्रोतः— https://www.npci.org.in
https://www.npci.org.in/product-review/bhim-product-overview)

## ■ पठन्तु लिखन्तु च –

'वित्तीय-साक्षरता' इत्युक्ते उचितरूपेण धनस्य आय-व्यययोः नियन्त्रणं धनसञ्चयनं प्रति जागरूकता च ।

## ■ वित्तकोषे लेखाम् उद्घाटयितुं निम्नलिखितानि आलेखानि अपेक्षितानि –

- भावचित्रम्
- आधार-पत्रम्
- मतदातृ-परिचय-पत्रम्
- स्थायि-लेखा-सङ्ख्या-पत्रम्
- विद्युतः व्ययपत्रकम्
- पत्र-सङ्केतः

## ■ डेबिट् कार्ड् द्वारा अनेकानि कार्याणि कर्तुं शक्नुमः । अधः केषाञ्चन कार्याणां सूची दीयते । भवान्/भवती अन्यकार्याणां नामानि लिखतु ।

- आपणेषु क्रयणम्
- अन्तर्जालमाध्यमेन क्रयणम्
- चिटिकायाः आरक्षणम्
- पथिशालायाः आरक्षणम्
- अन्तर्जालमाध्यमेन धनप्रदानम्
- विद्यालयस्य शुल्कदानम्
- कस्मैचित् धनप्रेषणम्
- ____________________
- ____________________
- ____________________
- ____________________

## उपर्युक्तानि विहाय भवान् / भवती स्वचालित-धन-विपत्र-द्वारा (डेबिट् कार्ड्) किं किं कर्तुं शक्नोति इति लिखतु –

**शिक्षकनिर्देशः**— 'वित्तीय-साक्षरता' इत्यस्मिन् विषये चर्चां कुर्मः। सहभागिनः पृष्ट्वा अनेन विषयेण सम्बद्धान् द्वित्रशब्दान् लिखामः। एते शब्दाः तेषां स्वभाषया अपि भवितुम् अर्हन्ति। यथा – 'रूप्यकाणि' इत्यस्य कृते 'रुपया' इत्यादि।

## मिलित्वा पठामः -

# दानस्य गणना

कश्चन महाराजः आसीत् । सः अतीव स्वार्थी आसीत् । स्वस्य सौकर्यार्थं सः सहस्रशः धन-व्ययं करोति स्म । परन्तु प्रजायाः कृते किञ्चित् अपि न व्ययं करोति स्म ।



एकदा तस्य राज्ये दुर्भिक्षं जातम् । सर्वे अपि जनाः महाराजस्य समीपं गतवन्तः । ते उक्तवन्तः "हे महाराज ! धान्यानां क्रयणार्थं कृपया धनसहायतां करोतु ।" परन्तु सः महाराजः किञ्चित् अपि धनं न दत्तवान् । सः उक्तवान् "अद्य सर्वे दुर्भिक्षस्य कारणेन पीडिताः । श्वः भूकम्पः आगच्छेत् । यदि एवमेव सर्वेषां सहायतां करोमि तर्हि सम्पूर्णः राजकोषः रिक्तः भविष्यति । तदा किञ्चित् अपि धनम् अवशिष्टं न भविष्यति ।" एतत् श्रुत्वा सर्वे निराशाः भूत्वा ततः प्रतिगताः ।



गच्छता कालेन दुर्भिक्षस्य समस्या वर्धमाना आसीत् । सहस्रशः जनाः बुभुक्षया मृताः । जनाः सहायता-निमित्तं पुनः पुनः महाराजस्य समीपं गतवन्तः । परन्तु महाराजः भीष्मप्रतिज्ञाम् इव स्वस्य निर्णये दृढः आसीत् ।

केषाञ्चन दिनानाम् अनन्तरम् एकः संन्यासी राजसभाम् आगतवान् । सः संन्यासी उक्तवान् "हे महाराज ! अहं बहुदूरात् आगतवान् । भवतः यशः अतीव प्रसिद्धम् अस्ति । भवान् कृपया



मम इच्छापूर्तिं करोतु।"

स्वस्य प्रशंसां श्रुत्वा महाराजः सन्तुष्टः जातः। सः उक्तवान् "हे साधो ! कृपया वदतु।

भवान् किम् इच्छति ?" संन्यासी उक्तवान् "अहं विंशतिं दिनानि यावत् बहुसामान्य-भिक्षायाः याचनां कर्तुम् इच्छामि। परन्तु मम भिक्षायाः एकः नियमः अस्ति। अहं प्रथमदिने यावत् धनं स्वीकरोमि द्वितीयदिने तस्य द्विगुणितं धनं स्वीकरोमि। तृतीयदिने द्वितीयदिनस्य द्विगुणितं धनं स्वीकरोमि। चतुर्थदिने तृतीयदिनस्य द्विगुणितं धनं स्वीकरोमि। अनेन प्रकारेण प्रतिदिनं पूर्वतनदिनस्य द्विगुणितं धनं स्वीकरोमि।"

महाराजः पृष्टवान् "भवान् प्रथमदिने कियत् धनं स्वीकरिष्यति ?"

संन्यासी उक्तवान् "केवलम् एकं रूप्यकम्।" एतत् श्रुत्वा महाराजः सन्तुष्टः जातः। सः राजकोषात् संन्यासिनः वचनानुसारं भिक्षां दातुं आदिष्टवान्।



पञ्चदश दिनानि व्यतीतानि। राजकोषाधिकारी विस्मितः जातः। संन्यासिनः भिक्षायां बहुधनं व्ययीकृतम्। राजकोषाधिकारी गणनां कृतवान् यत् विंशति-दिनेषु दशलक्षाधिक-अष्टचत्वारिंशत्-सहस्रोत्तर-पञ्चशताधिक-पञ्चसप्ततिः (१०४८५७५) रूप्यकाणि दातव्यानि इति।

सः एतां गणनां महाराजं सूचितवान्। गणनां दृष्ट्वा महाराजः अपि विस्मितः जातः।

## दानस्य गणना

| | |
|---|---|
| प्रथमं दिनम् | १ रूप्यकम् |
| द्वितीयं दिनम् | २ रूप्यके |
| तृतीयं दिनम् | ४ रूप्यकाणि |
| चतुर्थं दिनम् | ८ रूप्यकाणि |
| पञ्चमं दिनम् | १६ रूप्यकाणि |
| षष्ठं दिनम् | ३२ रूप्यकाणि |
| सप्तमं दिनम् | ६४ रूप्यकाणि |
| अष्टमं दिनम् | १२८ रूप्यकाणि |
| नवमं दिनम् | २५६ रूप्यकाणि |
| दशमं दिनम् | ५१२ रूप्यकाणि |
| एकादशं दिनम् | १०२४ रूप्यकाणि |
| द्वादशं दिनम् | २०४८ रूप्यकाणि |
| त्रयोदशं दिनम् | ४०९६ रूप्यकाणि |
| चतुर्दशं दिनम् | ८१९२ रूप्यकाणि |
| पञ्चदशं दिनम् | १६३८४ रूप्यकाणि |
| षोडशं दिनम् | ३२७६८ रूप्यकाणि |
| सप्तदशं दिनम् | ६५५३६ रूप्यकाणि |
| अष्टादशं दिनम् | १३१०७२ रूप्यकाणि |
| नवदशं दिनम् | २६२१४४ रूप्यकाणि |
| विंशतितमं दिनम् | ५२४२८८ रूप्यकाणि |
| आहत्य | १०४८५७५ रूप्यकाणि |

सः संन्यासिनम् आहूतवान् । महाराजः संन्यासिनं भिक्षायाः धनं न्यूनं कर्तुं प्रार्थितवान् ।

संन्यासी उक्तवान् "सर्वे जनाः दुर्भिक्षेण पीडिताः सन्ति ।

तेषां सहायतां कर्तुं मह्यं केवलं पञ्चाशत् सहस्रं (५००००) रूप्यकाणि एव अपेक्षितानि ।

एषा एव मम भिक्षा भवतु ।"

महाराजः बहुयाचनां कृतवान् । सः उक्तवान् "कृपया धनं न्यूनं करोतु।"

परन्तु संन्यासी स्वस्य निर्णये दृढः आसीत् ।

अनन्यगत्या महाराजः संन्यासिने पञ्चाशत् सहस्रं (५००००) रूप्यकाणि दत्तवान् ।

सम्पूर्णे देशे वार्ता व्याप्ता यत् राजकोषात् पञ्चाशत् सहस्रं (५००००) रूप्यकाणि दुर्भिक्षस्य समस्यां निवारयितुं प्रदत्तानि इति ।

सर्वे जनाः उक्तवन्तः "अस्माकं महाराजः कर्णः इव महान् दानी अस्ति" इति ।

- सुकुमार राय

स्रोतः – रिमझिम, कक्षा – ४,
रा.शै.अ.प्र.प.

## विचिन्त्य वदन्तु -

अधः प्रदत्तानां लोकोक्तीनाम् अर्थस्य चर्चां कुर्वन्तु -

| | | | |
|---|---|---|---|
| भवितव्यानां द्वाराणि भवन्ति सर्वत्र | आर्जवं हि कुटिलेषु न नीतिः | विषकुम्भं पयोमुखम् | शरीरमाद्यं खलु धर्मसाधनम् |
| गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः | कालस्य कुटिला गतिः | चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः | अति सर्वत्र वर्जयेत् |

भवान्/भवती कस्मिन् समये कस्याः सूक्तेः प्रयोगं करोति ?

# टिप्पणी